रैवतकं, क्ली, (रैवतकमेव। स्वार्थे अण्।) पारेवतवृक्षः। इति राजनिर्घण्टः॥ (पारेवतशब्देऽस्य गुणादिकं ज्ञेयम्॥)

रैवतकः, पुं, (रैवत एव। स्वार्थे कन्।) रैवतपर्व्वतः। तत्पर्य्यायः। उज्जयन्तः २। इति हेमचन्द्रः॥ (यथा, महाभारते।१।२२०।१।
"ततः कतिपयाहस्य तस्मिन् रैवतके गिरौ।
वृष्ण्यन्धकानामभवदुत्सवो नृपसत्तम!॥")
तस्य नामकारणं रैवतीशब्दे द्रष्टव्यम्॥

रैवतिकः, त्रि, (रेवती+"रेवत्यादिभ्यष्ठक्।" ४।१।१४६। इति ठक्।) रेवत्या अपत्यम्। इति मुग्धबोधव्याकरणम्॥

रोकं, क्ली, (रोचतेऽनेनेति। रुच्+घञ्। न्यङ्क्वादित्वात् कुत्वम्।) छिद्रम्। इत्यमरः।१।८।२॥ नौका। चलम्। इति मेदिनी॥ के, ३२॥

रोकः, पुं, (रुच्+घञ्।) क्रयभेदः। दीप्तिः। इति मेदिनी। के, ३१॥ (यथा, ऋग्वेदे। ३। ६। ७।
"दिवश्चिदाते रुचयन्त रोकाः।"
"ते रोकास्त्वदीया दीप्तयः।" इति तद्भाष्ये सायणः॥")

रोगः, पुं, (रुज्यतेऽनेनेति। रोजनमिति वा। रुज+घञ्। यद्वा, रुजतीति। रुज्+"पदरुजविशस्पृशो घञ्।" ३।३।१६। इति कर्त्तरि घञ्।) कुष्ठौषधम्। इति मेदिनी। गे, २३॥ देहभङ्गकारकः। तत्पर्य्यायः। रुक् २ रुजा ३ उपतापः ४ व्याधिः ५ गदः ६ आमयः ७। इत्यमरः। २। ६। ५१॥ अपाटवः ८ आमः ९ आतङ्कः १० भयः ११ उपघातः १२ भङ्गः १३ अर्त्तिः १४ तमोविकारः १५ ग्लानिः १६ चयः १७ अनार्ज्जवः १८ मृत्युभृत्यः १९। इति राजनिर्घण्टः॥ क्रमः २०। इति जटाधरः॥ मान्द्यम् २१ आकल्पम् २२। इति हेमचन्द्रः॥ *॥ अस्य निदानादिर्यथा,—

धन्वन्तरिरुवाच।

"सर्व्वरोगनिदानञ्च वक्ष्ये सुश्रुत तत्त्वतः।
आत्रेयाद्यैर्मुनिवरैर्यथापूर्व्वमुदीरितम्॥
रोगः पाप्मा ज्वरो व्याधिर्विकारो दुष्टमामयः।
यक्ष्मातङ्कगदाबाधाः शब्दाः पर्य्यायवादिनः॥
निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा।
संप्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते।
उत्पित्सुरामयो दोषविशेषेणानधिष्ठितः॥
लिङ्गमव्यक्तमल्पत्वात् व्याधीनां तद्यथातथम्।
तदेव व्यक्ततां यातं रूपमित्यभिधीयते॥
संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नमाकृतिः।
हेतुव्याधिविपर्य्यस्तं विपर्य्यस्तार्थकारिणाम्॥
औषधान्नविहाराणां उपयोगं सुखावहम्।
विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः॥
विपरीतोऽनुपशयो व्याधिसात्म्याभिसंज्ञितः।
यथा दुष्टेन दोषेण तथा चात्मविसर्पता॥
निर्वृत्तिरामयस्यासौ संप्राप्तिर्जातिरागतिः।
संख्याविकल्पप्राधान्यबलकालविशेषतः॥
स भिद्यते यथात्रैव संख्यन्तेऽष्टौ ज्वरा इति।
दोषाणां समवेतानां विकल्पोंऽशांशकल्पना॥
स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यमादिशेत्।
हेत्वादिकार्त्स्न्यावयवैर्बलाबलविशेषणम्॥
नक्तं दिनर्त्तुभुक्तांशैर्व्याधिकालो यथा मलम्।
इति प्रोक्तो निदानार्थः स व्यासेनोपदेक्ष्यते।
सर्व्वेषामेव रोगाणां निदानं कुपिता मलाः॥
तत्प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।
अहितस्त्रिविधो योगस्त्रयाणां प्रागुदाहृतः॥
तिक्तोषणकषायाम्लरूक्षाप्रमितभोजनैः।
धावनोदीरणनिशाजागरात्युच्चभाषणैः॥
क्रियाभियोगभीशोकचिन्ताव्यायाममैथुनैः।
ग्रीष्माहोरात्रभुक्तान्ते प्रकुप्यति समीरणः॥
पित्तं कट्वम्लतीक्ष्णोष्णकटुक्रोधविदाहिभिः।
शरन्मध्याह्नरात्र्यर्द्धविदाहसमयेषु च॥
स्वाद्वम्ललवणस्निग्धगुर्व्वभिष्यन्दिशीतलैः।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नादिदृंहणैः॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः।
पूर्व्वाह्ने पूर्व्वरात्रे च श्लेष्मा वक्ष्यामि शङ्करान्॥
मिश्रीभावात् समस्तानां सन्निपातस्तथा पुनः।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः।
पिण्याकमृद्यवसरापूतिशुष्ककृशामिषैः॥
दोषत्रयकरैस्तैस्तैस्तथान्नपरिवर्त्ततः।
ऋतोर्दुष्टात् पुरोवातात् ग्रहावेशविप्लवात्॥
दुष्टामान्नैरतिश्लिष्टग्रहैर्जन्मर्क्षपीडनात्।
मिथ्यायोगाच्च विविधात् पापानाञ्च निषेवणात्॥
स्त्रीणां प्रसववैषम्यात्तथा मिथ्योपचारतः।
प्रतिरोगमिति क्रुद्धा रोगविध्यनुगामिनः।
रसायनीं प्रपद्याशु दोषा देहे विकुर्व्वते॥"
इति गारुडे सर्व्वरोगनिदानं १५१ अध्यायः॥ रोगविशेषाणां औषधानि गारुडे १८९।१९०। १९१। १९२। १९३। १९४। १९५। १९६। १९७। १९८। १९९ अध्यायेषु द्रष्टव्यानि॥ सर्व्वरोगहरवैष्णवकवचञ्च तत्रैव २०० अध्याये द्रष्टव्यम्॥ *॥ अपि च।

"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः।
शिवभक्तश्च योगी च स एव विकृताकृतिः॥
भीमस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः।
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः॥
मन्दाग्निस्तस्य जनको मन्दाग्नेर्जनकास्त्रयः।
पित्तश्लेष्मसमीराश्च प्राणिनां दुःखदायकाः॥
वायुजः पित्तजश्चैव श्लेष्मजश्च तथैव च।
ज्वरभेदाश्च त्रिविधाश्चतुर्थश्च त्रिदोषजः॥
पाण्डुकः कामलः कुष्ठः शोथः प्लीहा च शूलकः।
ज्वरातिसारग्रहणीकाशव्रणहलीमकाः॥
मूत्रकृच्छ्रश्च गुल्मश्च रक्तदोषविकारकः।
आरिशो मेहनः कुब्जो गोदश्च गलगण्डकः॥
भ्रमरी सन्निपातश्च विसूची दारुणी सति।
एषां भेदप्रभेदेन चतुःषष्टिरुजः स्मृताः॥
मृत्युकन्यासुताश्चैते जरा तस्याश्च कन्यका।
जरा च भ्रातृभिः सार्द्धं शश्वद्भ्रमति भूतलम्॥
एते चोपायवेत्तारं न गच्छन्ति च संयुतम्।
पलायन्ते च तं दृष्ट्वा वैनतेयमिवोरगाः॥*॥
चक्षुर्जलञ्च व्यायामः पादाधस्तैलसेवनम्।
कर्णतैलं मूर्द्धि तैलं जराव्याधिविनाशकम्॥
वसन्ते भ्रमणं वह्निसेवास्वप्नं करोति यः।
बालाञ्च सेवते काले जरा तं नोपगच्छति॥
स्नातशीतोदकस्नायी सेवते चन्दनद्रवम्।
नोपयाति जरा तञ्च निदाघेऽनिलसेविनम्॥
प्रावृडुष्णोदकस्नायी घनतोयं न सेवते।
समये च यथाहारी जरा तं नोपगच्छति॥
शरद्रौद्रं न गृह्णाति भ्रमणं तत्र वर्जयेत्।
स्नातस्नायी समाहारी जरा तं नोपतिष्ठति॥
स्नातस्नायी च हेमन्ते काले वह्निं निषेवते।
भुङ्क्ते नवान्नमुष्णञ्च जरा तं नोपगच्छति॥
शिशिरेऽशुकवह्निञ्च नवोष्णान्नञ्च सेवते।
य एवोष्णोदकस्नायी जरा तं नोपगच्छति॥
सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम्।
घृतञ्च सेवते यो हि जरा तं नोपगच्छति॥
भुङ्क्ते सदन्नं क्षुत्काले तृष्णायां पीयते जलम्।
नित्यं भुङ्क्ते च ताम्बूलं जरा तं नोपगच्छति॥
दधि हैयङ्गवीनञ्च नवनीतं तथा शुभम्।
नित्यं भुङ्क्ते संयमी यो जरा तं नैव गच्छति॥
शुष्कमांसं स्त्रियो वृद्धा बालार्कं तरुणं दधि।
संसेवन्तं जरा याति प्रहृष्टा भ्रातृभिः सह॥
रात्रौ ये दधि सेवन्ते पुंश्चलीञ्च रजस्वलाम्।
तानुपैति जरा हृष्टा भ्रातृभिः सह सुन्दरि!॥
रजस्वला च कुलटा चावीरा जारदूतिका।
शूद्रयाजकपत्नी या ऋतुहीना च या सति!॥
यो हि तासामन्नभोजी ब्रह्महत्यां लभेत् सः।
तेन पापेन सार्द्धं सा जरा तमुपगच्छति॥
पापानां व्याधिभिः सार्द्धं मित्रता सन्ततं ध्रुवम्।
पापं व्याधिजराबीजं विघ्नबीजञ्च निश्चितम्॥
पापेन जायते व्याधिः पापेन जायते जरा।
पापेन जायते दैन्यं दुःखं शोकं भयं कलिः॥
तस्मात् पापं महावैरं दोषबीजममङ्गलम्।
भारते सन्ततं सन्तो नाचरन्ति भयातुराः॥
स्वधर्म्माचारयुक्तञ्च दीक्षितं हरिसेवकम्।
गुरुदेवातिथीनाञ्च भक्तं सक्तं तपःसु च॥
व्रतोपवासयुक्तञ्च सदा तीर्थनिषेविणम्।
पापा द्रवन्ति तं दृष्ट्वा वैनतेयमिवोरगाः॥
एतान् जरा न सेवेत व्याधिसङ्घश्च दुर्ज्जयः।
सर्व्वं बोध्यमसमये काले सर्व्वं ग्रहीष्यति॥*॥
ज्वरश्च सर्व्वरोगाणां जनकः कथितः सति।
पित्तश्लेष्मसमीराश्च ज्वरस्य जनकास्त्रयः॥
एते यथा सञ्चरन्ति स्वयं यान्ति च देहिषु।
तमेव विविधोपायं साध्वि मत्तो निशामय॥
क्षुधि जाज्वल्यमानायामाहाराभाव एव च।
प्राणिनां जायते पित्तं चक्रे च मणिपूरके॥
तालं विल्वफलं भुक्त्वा जलपानञ्च तत्क्षणम्।